अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
होतारं रत्नधातमम् ॥ १.००१.०१ ॥
अग्निः पूर्वेभिर् ऋषिभिर् ईड्यो नूतनैर् उत ।
स देवाँ एह वक्षति ॥ १.००१.०२ ॥
अग्निना रयिम् अश्नवत् पोषम् एव दिवे-दिवे ।
यशसं वीरवत्तमम् ॥ १.००१.०३ ॥
अग्ने यं यज्ञम् अध्वरं विश्वतः परिभूर् असि ।
स इद् देवेषु गच्छति ॥ १.००१.०४ ॥
अग्निर् होता कविक्रतुः सत्यश् चित्रश्रवस्तमः ।
देवो देवेभिर् आ गमत् ॥ १.००१.०५ ॥
यद् अङ्ग दाशुषे त्वम् अग्ने भद्रं करिष्यसि ।
तवेत् तत् सत्यम् अङ्गिरः ॥ १.००१.०६ ॥
उप त्वाग्ने दिवे-दिवे दोषावस्तर् धिया वयम् ।
नमो भरन्त एमसि ॥ १.००१.०७ ॥
राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिविम् ।
वर्धमानं स्वे दमे ॥ १.००१.०८ ॥
स नः पितेव सूनवे ऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ १.००१.०९ ॥

यज्ञेन वर्धत जातवेदसम् अग्निं यजध्वं हविषा तना गिरा ।
समिधानं सुप्रयसं स्वर्णरं दुक्षं होतारं वृजनेषु धूर्षदम् ॥ २.००२.०१ ॥
अभि त्वा नक्तीर् उषसो ववाशिरे ऽग्ने वत्सं न स्वसरेषु धेनवः ।
दिव इवेद् अरतिर् मानुषा युगा क्षपो भासि पुरुवार संयतः ॥ २.००२.०२ ॥
तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योर् अरतिं न्य् एरिरे ।
रथम् इव वेद्यं शुक्रशोचिषम् अग्निम् मित्रं न क्षितिषु प्रशंस्यम् ॥ २.००२.०३ ॥
तम् उक्षमाणं रजसि स्व आ दमे चन्द्रम् इव सुरुचं ह्वार आ दधुः ।
पृश्न्याः पतरं चितयन्तम् अक्षभिः पाथो न पायुं जनसी उभे अनु ॥ २.००२.०४ ॥
स होता विश्वम् परि भूत्व् अध्वरं तम् उ हव्यैर् मनुष ऋञ्जते गिरा ।
हिरिशिप्रो वृधसानासु जर्भुरद् द्यौर् न स्तृभिश् चितयद् रोदसी अनु ॥ २.००२.०५ ॥
स नो रेवत् समिधानः स्वस्तये संददस्वान् रयिम् अस्मासु दीदिहि ।
आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये ॥ २.००२.०६ ॥
दा नो अग्ने बृहतो दाः सहस्रिणो दुरो न वाजं श्रुत्या अपा वृधि ।
प्राची द्यावापृथिवी ब्रह्मणा कृधि स्व १ र् ण शुक्रम् उषसो वि दिद्युतः ॥ २.००२.०७ ॥
स इधान उषसो राम्या अनु स्व १ र् ण दीदेद् अरुषेण भानुना ।
होत्राभिर् अग्निर् मनुषः स्वध्वरो राजा विशाम् अतिथिश् चारुर् आयवे ॥ २.००२.०८ ॥
एवा नो अग्ने अमृतेषु पूर्व्य धीष् पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर् वृजनेषु कारवे त्मना शतिनम् पुरुरूपम् इषणि ॥ २.००२.०९ ॥
वयम् अग्ने अवृता वा सुवीर्यम् ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नम् अधि पञ्च कृष्टिषूच्चा स्व १ र् ण शुशुचीत दुष्टरम् ॥ २.००२.१० ॥
स नो बोधि सहस्य प्रशंस्यो यस्मिन् सुजाता इषयन्त सूरयः ।